नित्य पाठ पृ. 32 गीता.

[illegible]

गी०

सैन्यस्यसंज्ञार्थंतान्ब्रवीमिते ॥७॥ भवान्भीष्मश्चकर्ण
श्चकृपश्चसमितिंजयः ॥ अश्वत्थामाविकर्णश्चसौमदत्ति
स्तथैवच ॥८॥ अन्येचबहवःशूराःमदर्थेत्यक्तजीविताः
नानाशस्त्रप्रहरणाःसर्वेयुद्धविशारदाः ॥९॥ अपर्या
प्तंतदस्माकंबलंभीष्माभिरक्षितं ॥ पर्याप्तंत्विदमेते
षांबलंभीमाभिरक्षितं ॥१०॥ अयनेषुचसर्वेषुयथाभा
गमवस्थिताः ॥ भीष्ममेवाभिरक्षंतुभवंतःसर्वएवहि ॥
तस्यसंजनयन्हर्षंकुरुवृद्धःपितामहः ॥ सिंहनादं

विनद्योच्चैः शंखं दध्मौ प्रतापवान् १२ ततः शंखाश्च भेर्यश्च
पणवानकगोमुखाः सहसैवाभिहन्यंत स शब्दस्तुमु
लोभवत् १३ ततः श्वेतैर्हयैर्युक्ते महति स्पंदने स्थितौ
माधवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः १४ पांचज
न्यं हृषीकेशो देवदत्तं धनंजयः पौंड्रं दध्मौ महाशंखं भीम
कर्मा वृकोदरः १५ अनंतविजयं राजा कुंतीपुत्रो युधि
ष्ठिरः नकुलः सहदेवश्च सुघोषमणिपुष्पको १६
काश्यश्च परमेष्वासः शिखंडी च महारथः धृष्टद्युम्नो वि

राटश्च सात्यकिश्चापराजितः ॥१८॥ द्रुपदो द्रौपदेयाश्च
सर्वशः पृथिवीपते ॥ सौभद्रश्च महाबाहुः शंखान्द
ध्मुः पृथक्पृथक् ॥१९॥ स घोषो धार्तराष्ट्राणां हृदया
नि व्यदारयत् ॥ नभश्च पृथिवीं चैव तुमुलो व्यनुनादय
न् ॥२०॥ अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ॥ प्रवृ
त्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः ॥२१॥ हृषीकेशं तदा वा
क्यमिदमाह महीपते ॥ सेनयोरुभयोर्मध्ये रथं स्थापय
मेऽच्युत ॥२२॥ यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थि

ताच्

कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २३ ॥ योत्स्य
मानानवेक्षेहं य एतेत्र समागताः ॥ धार्तराष्ट्रस्य दुर्बुद्धे
र्युद्धे प्रियचिकीर्षवः ॥ २४ ॥ संजय उवाच ॥ एवमुक्तो हृ
षीकेशो गुडाकेशेन भारत ॥ सेनयोरुभयोर्मध्ये स्थाप
यित्वा रथोत्तमं ॥ २५ ॥ भीष्मद्रोणप्रमुखतः सर्वेषां च म
हीक्षितां ॥ उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥
२६ ॥ तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ॥
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २७

गी॰

श्वशुरान्सुहृदश्चैवसेनयोरुभयोरपि तान्समीक्ष्यस
कौंतेयःसर्वान्बंधूनवस्थितान् २८ कृपयापरयाविष्टो
विषीदन्निदमब्रवीत् अर्जुनउवाच दृष्ट्वेमंस्वजनंकृ
ष्णयुयुत्सुंसमुपस्थितं २९ सीदंतिममगात्राणि
मुखंचपरिशुष्यति वेपथुश्चशरीरेमेरोमहर्षश्च
जायते ३० गांडीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते न
चशक्नोम्यवस्थातुंभ्रमतीवचमेमनः ३१ निमि
त्तानिचपश्यामिविपरीतानिकेशव नचश्रेयोऽ

पश्यामि हत्वा स्वजनमाहवे ॥ ३२ ॥ न कांक्षे विजयं कृ
ष्ण न च राज्यं सुखानि च ॥ किं नो राज्येन गोविंद किं भो
गैर्जीवितेन वा ॥ ३३ ॥ येषामर्थे कांक्षितं नो राज्यं भो
गाः सुखानि च ॥ त इमे वस्थिता युद्धे प्राणांस्त्यक्त्वा ध
नानि च ॥ ३४ ॥ आचार्याः पितरः पुत्रास्तथैव च पितामा
हाः ॥ मातुलाः श्वशुराः पौत्राः स्यालाः संबंधिनस्तथा ॥
३५ ॥ एतान्न हंतुमिच्छामि घ्नतोपि मधुसूदन ॥ अपि त्रै
लोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३६ ॥ निहत्य धा

गी॰

र्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ॥ ३५ ॥ पापमेवाश्रयेद
स्मान्हत्वैतानाततायिनः ॥ ३६ ॥ तस्मान्नार्हा वयं ह
न्तुं धार्तराष्ट्रान्स्वबांधवान् ॥ स्वजनं हि कथं हत्वा सुखि
नः स्याम माधव ॥ ३७ ॥ यद्यप्येते न पश्यंति लोभोपहत
चेतसः ॥ कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं ॥ ३८ ॥
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं ॥ कुलक्ष
यकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥ कुलक्षये प्रणश्यं
ति कुलधर्माः सनातनाः ॥ धर्मे नष्टे कुलं कृत्स्नमधर्मो

र्मोभिभवत्युत ॥ ४० ॥ अधर्माभिभवात्कृष्णप्रदुष्यंति
कुलस्त्रियः ॥ स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः
॥ ४१ ॥ संकरोनरकायैवकुलघ्नानांकुलस्यच ॥ पतंतिपि
तरोह्येषांलुप्तपिंडोदकक्रियाः ॥ ४२ ॥ दोषैरेतैः कुलघ्ना
नांवर्णसंकरकारकैः ॥ उत्साद्यंतेजातिधर्माः ॥ कुलधर्मा
श्चशाश्वताः ॥ ४३ ॥ उत्सन्नकुलधर्माणांमनुष्याणांजना
र्दन ॥ नरकेनियतंवासोभवतीत्यनुशुश्रुम ॥ ४४ ॥ अहो
बतमहत्पापंकर्तुंव्यवसितावयं ॥ यद्राज्यसुखलोभेन

भी·

हंतुं स्वजनमुद्यतः ॥४५॥ यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ॥ धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥४६॥ संजय उवाच ॥ एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ॥ विसृज्य सशरं चापं शोकसंविग्नमानसः ॥४७॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादो नाम प्रथमोध्यायः ॥ १ ॥ संजय उवाच ॥ तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं ॥ विषीदंतमिदं वाक्यमुवाच मधुसूदनः ॥१॥ श्रीभगवानुवाच ॥

कुतस्त्वाकश्मलमिदंविषसमुपस्थितम् ॥ अ
नार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन ॥ २ ॥
क्लैब्यंमास्मगमः पार्थनैतत्वय्युपपद्यते ॥
क्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप ॥ ३ ॥
अर्जुनउवाच ॥ कथंभीष्ममहंसंख्येद्रोणं
चमधुसूदन ॥ इषुभिःप्रतियोत्स्यापूजार्हा
वरिसूदन ॥ ४ ॥ गुरूनहत्वाहिमहानुभावान्

श्रे.पो भोक्तुं भैक्ष्यमपीहलोके ॥ हत्वार्थकामांस्तु
गुरूनिहैव भुंजीय भोगान्रुधिरप्रदिग्धान् ॥
५॥ न चैतद्विद्मः कतरन्नो गरीयो यद्वा जये
म यदि वा नो जयेयुः ॥ यानेव हत्वा न जिजी
विषामस्तेवस्थिताः प्रमुखे धार्तराष्ट्राः ॥६॥
कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसं
मूढचेताः ॥ यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शि

ष्यस्तेहं शाधि मां त्वां प्रपन्नं ॥ ७ ॥ न हि प्रपश्यामि

ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां ॥ अ

वाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चा

धिपत्यं ॥ ८ ॥ संजय उवाच ॥ एवमुक्त्वा हृ

षीकेशं गुडाकेशः परंतप ॥ न योत्स्य इति गो

विंदमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥ तमुवाच हृषी

केशः प्रहसन्निव भारत ॥ सेनयोरुभयोर्मध्ये

विषीदंतमिदं वचः १० श्रीभगवानुवाच अ
शोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे
गतासूनगतासूंश्च नानुशोचंति पंडिताः
११ न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः
न चैव न भविष्यामः सर्वे वयमतः परं १२ दे
हिनोस्मिन्यथा देहे कौमारं यौवनं जरा
तथा देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति १३ मात्रा
स्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः आ

गमापायिनोनित्यास्तांस्तितिक्षस्वभारत १४
यंहिनव्यथयंत्येते पुरुषं पुरुषर्षभ समदुःख
सुखंधीरंसोमृतत्वाय कल्पते १५ नासतोविद्य
तेभावोनाभावोविद्यतेसतः उभयोरपिदृष्टों
तस्त्वनयोस्तत्वदर्शिभिः १६ अविनाशितुत
द्विद्धियेनसर्वमिदंततं विनाशमव्ययस्यास्य
नकश्चित्कर्तुमर्हति १७ अंतवंतइमेदे
नित्यस्योक्ताशरीरिणः अनाशिनोप्रमेयस्य

नहमा घुघ्यसुभारत २८ पएनंवेत्तिहंतास्
पश्चौनंयन्यतेहतं उमोत्तोनविज्ञामीतोना
पंहंत्तिनहन्यते २५ नजा.पतेम.एतेवाकप
त्रिश्चा पंभ्र्.सा भवितावानभ्र्.पः अ.जो.नित्या
साभूत्तो.पं.कुत.एणो नहन्यस.हन्म मानेझरी
उ २० वेदाविनाशिनंनित्ये पएनमजमव्य
पं कथं सपुरुषपार्थकंघा..पतिहंतिकं २१
वासांसि जीर्णानि यथा विहाय नवानि गृ...

तिनरोपराणि तथाशरीराणिविहाय जीर्णान्य
न्यानिसंयातिनवानिदेही २२ नैनंछिंदंतिशस्त्रा
णि नैनंदहतिपावकः नचैनंक्लेदयंत्यापोनशो
षयतिमारुतः २३ अछेद्योयमदाह्योयमक्ले
द्योशोष्यएवच नित्यः सर्वगतः स्थाणुरचलो
यंसनातनः २४ अव्यक्तोयमचिंत्योयमवि
कार्योयमुच्यते तस्मादेवंविदित्वैनंनानुशो
चितुमर्हसि २५ अथचैनंनित्यजातंनित्यं

वामन्यसेमृतं तथापित्वंमहाबाहोनैवंशोचितुमर्हसि २६
जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच तस्मा
दपरिहार्येर्थेनत्वंशोचितुमर्हसि २७ अव्य
क्तादीनिभूतानिव्यक्तमध्यानिभारत अव्य
क्तनिधनान्येवतत्रकापरिदेवना २८ आश्च
र्यवत्पश्यतिकश्चिदेनमाश्चर्यवद्वदतितथै
वचान्यः आश्चर्यवच्चैनमन्यःशृणोतिश्रु

ताप्येनंवेदनचैवकश्चित् २९ देहीनित्यम

वध्योयंदेहेसर्वस्यभारत तस्मात्सर्वाणिभू

तानिनत्वंशोचितुमर्हसि ३० स्वधर्ममपिचावे

क्ष्यनविकंपितुमर्हसि धर्म्याद्धियुद्धाच्छ्रेयोन्य

त् क्षत्रियस्यनविद्यते ३१ यदृच्छयाचोपपन्नं

स्वर्गद्वारमपावृतं सुखिनः क्षत्रियाः पार्थल

भंतेयुद्धमीदृशं ३२ अथचेत्त्वमिमंधर्म्यंसंग्राम

नकरिष्यसि ततः स्वधर्मंकीर्त्तिंचहित्वापाप

नास्यसि ३३ अकीर्तिंचापि भूतानि कथयिष्यं
तितेऽव्ययां संभावितस्यचाकीर्तिर्मरणादि
तिरिच्यते ३४ भयाद्रणादुपरतं मंस्यंते त्वां
महारथाः येषांचत्वंबहुमतो भूत्वा यास्य
सिलाघवं ३५ अवाच्यवादांश्च बहून्वद
िष्यंतितवाहिताः निंदंतस्तवसामर्थ्यंत
तोदुःखतरंनुकिं ३६ हतोवाप्राप्स्यसिस्वर्गंजि
त्वावाभोक्ष्यसेमहीं तस्मादुत्तिष्ठकौंतेय

हि ४

युद्धायकृतनिश्चयः ३७ सुखदुःखेसमे
कृत्वालाभालाभौजयाजयौ ततोयुद्धाय
युज्यस्वनैवंपापमवाप्स्यसि ३८ एषाते
भिहितासांख्येबुद्धिर्योगेत्विमांशृणु बुद्ध्या
युक्तोययापार्थकर्मबंधंप्रहास्यसि ३९
नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते
स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात् ४०
व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन ॥

बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ४१
यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवा
दरताः पार्थ नान्यदस्तीति वादिनः ४२ का
मात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रिया
विशेषबहुलां भोगैश्वर्यगतिं प्रति ४३ भो
गैश्वर्यप्रसक्तानां तयापहृतचेतसां व्यव
सायात्मिका बुद्धिः समाधौ न विधीयते ४४
त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन

न निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्म
वान् ४५ यावानर्थ उदपाने सर्वतः संप्लुतो
दके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजान
तः ४६ कर्मण्येवाधिकारस्ते मा फलेषु कदा
चन मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वक
र्मणि ४७ योगस्थः कुरु कर्माणि संगं त्यक्त्वा
धनंजय सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं
योग उच्यते ४८ दूरेण ह्यवरं कर्म बुद्धि

योगाद्धनंजय बुद्धौ शरणमन्विच्छ कृपणाः
फलहेतवः ४९ बुद्धियुक्तो जहातीह उभे
सुकृतदुःकृते तस्माद्योगाय युज्यस्व योगः
कर्मसु कौशलम् ५० कर्मजं बुद्धियुक्ता हि
फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः
पदं गछंत्यनामयं ५१ यदाते मोहकलिलं
बुद्धिर्व्यतितरिष्यति तदा गंता
सि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२ श्रुति

र्विप्रतिपन्नातेयदास्थास्यतिनिश्चला समा
धावचलाबुद्धिस्तदायोगमवाप्स्यसि ५३
अर्जुनउवाच स्थितप्रज्ञस्यकाभाषासमा
धिस्थस्यकेशव स्थितधीःकिंप्रभाषेतकि
मासीतव्रजेतकिं ५४ श्रीभगवानुवाच
प्रजहातियदाकामान्सर्वान्पार्थमनोगतान्
आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते ५५
दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः

वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते यः
पः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं ना
भिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७
यदा संहरते चायं कूर्मोंगानीव सर्वशः इंद्रिया
णींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८
विषया विनिवर्त्तंते निराहारस्य देहिनः रस
वर्जं रसोप्यस्य परं दृष्ट्वा निवर्त्तते ५९ यततो
ह्यपि कौंतेय पुरुषस्य विपश्चितः इंद्रियाणि

प्रमाथीनि हरंति प्रसभं मनः ६० तानि सर्वा
णि

णिसंयम्य युक्तआसीतमत्परः वशेहियस्यें
द्रियाणि तस्यप्रज्ञाप्रतिष्ठिता ६१ ध्याय
तो विषयान्पुंसः संगस्तेषूपजायते संगात्सं
जायते कामः कामात्क्रोधोभिजायते ६२
क्रोधाद्भवति संमोहः संमोहात्स्मृति
विभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिना
शात्प्रणश्यति ६३ रागद्वेषवियुक्तैस्तु
विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधे

पात्मा प्रसादमधिगछति ६४ प्रसादेस
र्वदुःखानां हानिरस्योपजायते प्रसन्न
चेतसो ह्याशुबुद्धिः पर्यवतिष्ठते ६५ ना
स्तिबुद्धिरयुक्तस्यनचायुक्तस्य भावना
नचाभावयतः शांतिरशांतस्य कुतः सुखं
६६ इंद्रियाणां हि चरतां यन्मनोनुविधीय
ते तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि

६७ तस्माद्यस्य महाबाहो निगृहीतानि स

र्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्र
तिष्ठिता ६८ यानिशा सर्वभूतानां तस्यां
जागर्ति संयमी यस्यां जाग्रति भूतानि
सानिशा पश्यतो मुनेः ६९ आपूर्यमाणम
चलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्
तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नो
ति न कामकामी ७० विहाय कामान्यः
सर्वान्पुमांश्चरति निःस्पृहः निर्ममो नि

म

रहंकाः सशांतिमधिगछति ७१ एषाब्राह्मी
स्थितिः पार्थ नैनांप्राप्यविमुह्यति स्थित्वा
स्यामंतकालेपिब्रह्मनिर्वाणमृछति ७२
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मवि
द्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसां
ख्ययोगोनामद्वितीयोध्यायः २ अर्जुनउवाच

... म इ तु ॥ ...

ऐ ता सुम कल पुष्पि

ला सत क क्षे क ज्ञा क ज्ञा ल कला म र ॥

ला सत क क्षे [illegible] ज्ञा व स ला ज्ञा द ला सी र ॥ सी

तीला पुल ज्ञा व सा ला ज्ञा द ला सी र ॥ व स

क्षे ले ज्ञे ला ला ज्ञे व ती म ला ज्ञे ला ला ३ ले व स

ल ज्ञा क ला ॥ ३ ले ले या ग ला ला सी ज्ञे ला ॥

ज्ञ ला ॥ ती पो पुल ज्ञ व स य ज्ञ ला ज्ञा ले

त ज्ञा क ला ॥ ती पो पु ल ज्ञ व स य ज्ञ ला ज्ञा ले

३ य व ज्ञा ॥ ती पो पुल ज्ञ व स य ज्ञ [illegible] य ॥ २ ला ६

ज्ञा ॥ १ ॥ ३० ३ ॥ ला य ॥ २ ला ६

ग ॥ कु भ त

संध्या

भूः भुवः स्वः ओं स्नापफट् ॥१॥ अभिरंग

स्य ब्राः ततः ओं तेजोसी त्वेस देवाऋष

प भुगं दैवतं गा.प गीछंदे गा.प.न्यावा

ह विनियोगः ॥ तेजोसी भुक्रमस

अमृतमसी धामनामासी प्रियं देवना

मनाधृष्टं देवयजनमसी ॥२॥ इस्याप्रारं ॥

भुरोयजसी त्वपस्य विमलश्रीर

प्र...ः परमात्मा देवता गायत्री पावस्या

ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुः
पद्यसि नहि पद्यसे नमस्ते तुरीयाय दर्शि
ताय पदाय परोरजसे सावदोमा प्रापत् ॥ तत्
ॐ प्राणं न्न वैरदद देविग्रस्य रेत्रभवा दन्त्रो ॥
गायत्री छंदः सावित्रः ब्रह्मणो विनियोगः ॥
ॐ भूः भुवः स्वः तत्सवितुर्वरेण्यं भर्गो
देवस्य धीमहि धियो यो नः प्रचोदयात् ॥
[illegible]

स्मिनी॥ ब्रह्मणः समनुः ज्ञो॥ गद्धदेवी

आपेक्षपा॥ इ॥ इ॥ तिसं ध्याविधिस

माप्ता॥ भुभ मस्तु॥ राम राम॥

ॐ ब्रह्मणाय स्वाहा॥ ॐ वागाय स्वाहा॥

ॐ समानाय स्वाहा॥ ॐ कानाय स्वाहा॥

ॐ मानाय स्वाहा॥ ॐ ब्रह्म लोक धान

मसि स्वाहा॥ ॐ ब्रह्म लोक प्र[illegible]निसि स्वाहा॥

गुह्यातिगुह्यगोपलतं गृहाणास्मत
कृतंजपं गतलसिर्द्धभवतिमेदेवःत
त्वप्रशादात्सुरेश्वरी ॥१॥ ॐनमोवि
श्वनेत्रनिरा भाश्वते विष्णुतेजसेज
गत्पविगेशुचयेशाविगेकर्मदापने
जगत्श्राधिशोए बोप्रर्घश्रीसूर्या
य नमः ॥ कारण संसारि जो आगे कुं

नेनाज्ञाननिरणः ॥ तस्यास्मरणमात्रेण

दुःस्वप्नं सुस्वप्नं ...न्ति ॥ कुर्कुटपादनमः ३

अखण्डमण्डलाकारं व्याप्तं येन चराचरं ॥

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥२

समुद्रमेखले देवी पर्वतस्तनमण्डले

विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

१

तर्पण

ॐ ब्रह्मादयो देवाः आगच्छन्तु ॥ ॐ ब्रह्मा तृप्यतां ॥ ॐ विष्णुस्तृप्यतां ॥ ॐ रुद्रस्तृप्यतां ॥ ॐ प्रजापतिस्तृप्यतां ॥ ॐ देवा यक्षास्तथा नागा गंधर्वाप्सरसोऽसुराः ॥ क्रूराः सर्पाः सुपर्णाश्च तरवो जंभकाः खगाः ॥ विद्याधरा जलाधारास्तथैवाकाशगामिनः ॥ निराधाराश्च ये जीवा पापे धर्मे रताश्च ये ॥
[illegible]

ॐ मरीचिस्तृप्यतां ॥ ॐ अत्रिस्तृप्यतां ॥
ॐ अंगिरास्तृप्यतां ॥ ॐ पुलस्त्यस्तृप्यतां ॥
ॐ पुलहस्तृप्यतां ॥ ॐ क्रतुस्तृप्यतां ॥
ॐ प्रचेतास्तृप्य. ॐ वसिष्ठस्तृप्यतां ॥
ॐ भृगुस्तृप्यतां ॥ ॐ नारदस्तृप्यतां ॥
इति ऋषीन् देववत् ॥ ततः ॐ सनकस्तृ
प्यतां ॥ ॐ सनंदनस्तृप्यतां ॥ ॐ सनातनस्तृ
[illegible] प्यतां ॥

२

नमः ॐ यमाय नमः ॥ धर्मराजाय नमः ॥
ॐ मृत्यवे नमः ॥ ॐ अंतकाय नमः ॥
ॐ वैवस्वताय नमः ॥ ॐ कालाय नमः ॥
ॐ सर्वभूतक्षयाय नमः ॥ ॐ औदुंबरा
य नमः ॥ ॐ दध्नाय नमः ॥ ॐ नीला
य नमः ॥ ॐ परमेष्ठिने नमः ॥ ॐ वृ
कोदराय नमः ॥ ॐ चित्राय नमः ॥

ॐ विगवयत्ताप नमः॥ ततः प्रागंधत्तुमेपि

तरइ मं गन्नं त्व पोक्तलि मित्तिपितृ राञ्च्वावाला।

ॐ प्रधकाश्यपपिता अमुकवर्मरा: तृ

पत्तां मिदं जलं सतिलं तस्मै स्वधा॥

ॐ अद्य अमुक गोत्र पितामह अमुकवर्म

रा: मिदं जलं सतिलं तस्मै स्वधा॥ ॐ अ

प अमुक गोत्र प्रपितामह अमुकवर्मरा

साति लंक्षस्यै सखा॥ येके चास्मत्कुले पाता
अपुत्रा गोत्रिणो मृताः। ते गृह्णंतु मया दत्तं
वस्त्रनिःपीडनोदकं॥ ॐ श्रीगणेशाय नमः॥ अथ स्नानध्य
प्रयोगः ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत ततो रा
जायत ततः समुद्रो अर्णवः समुद्रादर्णवदधि संवत्सरोजायत पु
हो रात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचंद्रमसौ य था
ता पूर्वम

3२८५

६

चौरीकवच

ध्यानं ॥

वालार्कविद्युत्प्रभां त्रिनेत्रां चतुराननां गायत्रीं वरदां रक्तां स्रुक्स्रुवधरां कमण्डलुधरां देवीं हंसवाहनसंस्थितां ग्रहलोकनिवासिनीं ॥ अं उं रागवा ॥ ऐं देवी गायत्री सूर्यमण्डलात् ॥ इति प्रातर्गायत्री ध्यानं ॥

ॐश्रीगणेशायनमः ॐनमश्चण्डिका
यै शतानीक उवाच यद्गुह्यं परमं लो
के सर्वरक्षाकरं नृणाम्ः यन्न कस्य
चिदाख्यातं तन्मे ब्रूहि पितामहः॥
श्रीब्रह्मोवाच अस्ति गुह्यतमं वि
प्र सर्वभूतोपकारकम् देव्यास्तु
कवचं पुण्यं तच्छृणुष्व महामु

ने २ प्रथमंशैलपुत्रीचाद्वितीयंब्र
ह्मचारिणी तृतीयंचन्द्रघंटे
तिकूष्मांडेतिचतुर्थकम् ३ पंच
मंस्कंदमातेतिषष्ठंकात्यायनीति
च सप्तमंकालरात्रीचमहागौरी
तिचाष्टमं ४ नवमंशिवदूतीच
नवदुर्गाप्रकीर्तिताः ५ उक्तान्येता

निनामानिवृहन्नरोगनमस्कामना ५
स्निनिनादह्यमा... कुशबुमध्येगतो
रसो विसमेदुः मेते ...यन्तोश्र
...नाः ६ ...जागते किंचि
...नदराश्चोके ...पदास्तम
पर्यन्तिष्ठाकटु:...संयंकरी ७
यस्तुमनयास्म...नन्तेभ्यः...

प्रजायते प्रेतसंस्थानुचामुण्डा
वाराहीमहिषासना ८ ऐन्द्री
गजसमारूढा वैष्णवीगरुडासन।
माहेश्वरीवृषारूढा कौमारीशि
खिवाहनी ९ ब्राह्मीहंससमारू
ढा सर्वाभरणभूषिताः लक्ष्मीप
द्मासनादेवीपद्महस्ताहरिप्रिया १०

स्वेनरूपभेदेवीईश्वरीवषवाहनी ॥
९ तास्तामातरः सर्वाः सर्वयोगसमन्विता ११ नानाभरणशोभाढ्यानाना[illegible]परिशोभिताः दृश्यन्तेरथमारूढादेव्यः क्रोधसमाकुला १२ शंखचक्रगदाशक्तिहलचमुशलायुधं खेटकंतोमरंचैवपरशुंपाशमे

वच १३ कृतायुधं च खड्गं च शार्ङ्गं चायुध
मुत्तमं दैत्यानां देहनाशाय भक्तानां
मभयाय च १४ धारयंत्यायुधानि
देवानां च हिताय वै नमस्तेस्तु महारौ
द्रे महाघोरपराक्रमे १५ महाबले
महोत्साहे महाभयविनाशिनि ॥
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्ध

द्विनि ञ्रौं ह्रिं मौं टें विंदु: ञ्रं १६ प्राच्यां र
क्षतु मामैंद्री आग्नेय्यामग्निदेवता द
क्षिणेऽवतु वाराही नैरृत्यां खड्गधा
रिणी १७ प्रतीच्यां वारुणी रक्षेद्वा
यव्यां मृगवाहनी उदीच्यां रक्षकौ
मारि ईशान्यां शूलधारिणी १८ उ
र्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी

तथा ऐवंदशादिशोरक्षेच्चामुङाउशा
ववाहनी १९ जयाममाग्रतःपातुवि
जयापातुपृष्ठतः अजितावाममपा
र्श्वेतुदक्षिरोचापराजिता २० शि
खोद्योतिनीरक्षेदुमामूर्द्धिव्यवस्थिता
मालाधरिललाटेतुभ्रुवौरक्षे[illegible]श
स्विनी २१ त्रिनेत्राचभ्रुवोर्मध्ये
[illegible]नासिके शंखिनी[illegible]

मेधाश्रोत्रयोद्वारवासिनी २२ कपालौ
कालिकारक्षेत्कर्णमूलेतुशांकरी
नाशिकांयांसुगंधाचउत्तरोष्ठेचचर्चि
का। २३ अधरेचामृतकलाजिह्वा
यांचसरस्वती दंतांरक्षतुकौमा
रीकंठमध्येतुचंडिका २४ घंटि
कांचित्रघंटाचमहामायाचतालुके

कामाक्षा चिबुकं रक्षेद्वाचमे सर्वमंगला २५

ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्द्ध

री नीलग्रीवा वहिः कंठे नलिकां

नलकूवरी २६ स्कंधयोः खड्गिनी

रक्षेद्बाहू मे वज्रधारिणी हस्तयोर्द

ण्डिनी रक्षेदंबिका चांगुलीस्तथा २७

नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेन्न

लेश्वरी स्तनौरक्षेन्महांदेवीमनः शोक
विनाशिनी २९ हृदयेललितादेवीउद्द
रे मूलधारिरक्षी नाभौचकामिनी
रक्षेद्गुह्यंगुह्येश्वरीतथा २२ पूतना
कामिकामेढ्रंगुदेमहिषवाहनी
कट्यांभगवतीरक्षेजानुनीविंध्यवा
सिनी ३० जंघेमहाबलारक्षेत्सर्वेका

न्मप्रदायिनी गुल्फयोर्नारसिंहीच पा
दपृष्ठमितौजसी ३१ पादांगुलीषु
श्रीरक्षेत्पादधस्थलवासिनी दंष्ट्रा
करालिनीरक्षेन्नखेषु [illegible] वौ [illegible] ३२
रोमकूपेषुकौमारी त्वचंवागीश्वरीतथा
रक्तमज्जावसामांसान्यस्थिमेदांसिपार्वती ३३ [illegible]

रेश्वरी पद्मावतीपद्मकोशेकपेचूडाम

शिस्तथा ३४ ज्वालामुखीनखवज्वाला

मभेद्यासर्वेन्द्रियेषु भुजंगप्रसनारिरोमेरं

ध्वेस्त्याधात्रेश्वरीतथा ३५ मरुदकों

...ननौंबुद्धिंरक्षमेधमेधारस्ती प्राणा

पानौतथाव्यानमुदानंचसमानकं ३६

वज्रहस्ताचमेरधेत्प्राणाकल्पंचशोभनै

रसेरूपेचगंधेचशब्दस्पर्शेचयोगिनी ३७

सत्वंरजस्तमैश्चैवरक्षेन्नारायणीसदा

आपूरक्षतुवाराहीधर्मरक्षतुवैष्णवी ३९

यशःकीर्तिःचलक्ष्मीवधनंविद्याचचक्रिणी

गोत्रमिंद्राणिमेरक्षेत्पशून्मेरक्षचंडिके

३२ पुत्रान्रक्षेन्महालक्ष्मीभार्यांरक्षतु

भैरवी पंथानंसुपेथारक्षेन्मार्गं[illegible]म

[illegible]रीनथा ४ राजद्वारेमहालक्ष्मीविज

यासर्वतःस्थिता रक्षाहीनंतुयत्स्थानं

वर्जितंकवचेनतु ४१ नास्यवैरस्समेदेवी
जयंतीपापनाशिनी पदमेकंनगच्छेत
यदीच्छेच्छुभमात्मनः ४२ कवचेना
वृतोनित्यंयत्रयत्रैवगच्छति: तत्रत
त्रार्थलाभश्चविजयःसर्वकामिकः
४३ यंयंचिंतयतेकामंतंतंप्राप्नोति
निश्चितं परमैश्वर्यमतुलंप्राप्स्य

नेभूतलेपुमान् ४४ निर्भयोजायतेम
र्त्यः संग्रामेष्वपराजितः त्रैलौक्येतुभ
वेत्पूज्यः कवचेनावृतः पुमान् ४५ ई
दं देव्याकवचं देवानामपिदुर्लभं यः
पठेत्प्रातसानित्यंत्रिसंध्यं श्रद्धयान्वि
तः ४६ देवीकलामवेत्तस्यत्रैलोक्येष्व
पराजितः जीवेद्वर्षशतं साग्रमपमृत्यु

मृत्युविवर्जितः ४७ नश्यंति साधयः स

र्वे नाविस्फोटकादयः स्थावरं जंगमं च

पि कृत्रिमं चापि यद्भवं ४८ अभिचारादि

सर्वाणि मंत्रयंत्राणि भूतले भूचरादि

चराश्चैव कुलजाश्चापदेशिकाः ४९ स

हजा कुलजा माला डाकिनी शाकिनी त

था अंतरिक्षचरा घोरा डाकिन्यश्च

सा बला: ५० गरुडं तापिशाचाश्च यक्ष गं
धर्वराक्षसा: ब्रह्मराक्षसवेताला: कूष्मा
ण्ड भैरवादय: ५१ नश्यंति दर्शनात्तस्य
वेवस्त्री संक्षिपेत मानोनतिर्भवेद्ध्रुवं
मोजोवीर्द्धकरं परं ५२ प्रशस्तावर्द्धते नो
पकीर्तिर्न पैडिताच्च [illegible] गोचरापूसतीवं
[illegible] वृत्ते: ५३ यावद्भूमंडलं

धं तेसशैलवनकानन नवौ[illegible]ति मैः
गांजनकतुं[illegible]सं[illegible] ति: ५४ देहोतेपरम
स्य[illegible]यात्सुरैर[illegible]मे प्राप्नोति
तेषां तेषां म[illegible]मायाप्र[illegible]
नि[illegible]हृ[illegible]विर[illegible]तं दे[illegible]
वे[illegible] [illegible] चिरमाव ॥ श्री[illegible]